Sanvahak, Vol.-2; Issue-1 (Jan.-March) 2026 : PP-55-63

Sanvahak (संवाहक)

A Peer Reviewed, Multidisciplinary (All Subjects) & Multilingual (All Languages) Quarterly Research journal

**ISSN : 3108-1347 (Online)**
Vol.-2; Issue-1 (Jan.-March) 2026
Page No.- 55-63
©2026 **Sanvahak**
**DOI ; 10.71037/sanvahak.v2i1.09**
https:// sanvahak.gyanvividha.com

**Author's:**

**1. डॉ. देवेंद्रसिंहः राजपूतः**
सहायकाचार्यः, संस्कृतविभागः, हरियाणा केन्द्रीय विश्वविद्यालयः, महेन्द्रगढ़म्

Corresponding Author :
**डॉ. देवेंद्रसिंहः राजपूतः**
सहायकाचार्यः, संस्कृतविभागः, हरियाणा केन्द्रीय विश्वविद्यालयः, महेन्द्रगढ़म्

# वेदान्तसारे निगदितस्य अध्यारोपापवादन्यायस्य तात्त्विकं विश्लेषणम्

**शोधसारांशः** अस्मिन् शोधपत्रे सदानन्दयतिवर्येण वेदान्तसारे प्रतिपादितस्य अध्यारोपापवादन्यायस्य तात्त्विकं दार्शनिकं च विश्लेषणं साङ्गं कृतम्। अद्वैतवेदान्तदर्शने ब्रह्मज्ञानप्राप्तये अध्यारोपापवादप्रक्रिया सर्वोत्कृष्टा शिक्षणपद्धतिः महत्तत्त्वपूर्णा च वर्तते। वेदान्तशास्त्रस्य आदौ उपवर्णितैः अनुबन्धचतुष्टयैः— विशेषतः नित्यानित्यवस्तुविवेक-इहामुत्रार्थफलभोगविराग-शमादिषट्कसम्पत्ति-मुमुक्षुत्वैः सम्पन्नः अधिकारी यदा संसारतापेन सन्तप्तः सन् तत्त्वज्ञानाय गुरुमनुसरति, तदा गुरुः अध्यारोपापवादन्यायेन तस्मै तत्त्वोपदेशं करोति। अत्र वस्तुरुपे सच्चिदानन्दाद्वैतब्रह्मणि अवस्तुरुपस्य अज्ञानस्य तत्कार्यभूतस्य सकलजगत्प्रपञ्चस्य च भ्रान्त्या आरोपः एव अध्यारोपः उच्यते। इदम् अज्ञानं सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं च सत् आवरण-विक्षेपशक्तिद्वयेन युक्तं भवति। एतद् अज्ञानं समष्टिव्यष्टिभेदेन ईश्वर-प्राज्ञयोः रुपेण, विशुद्धमलिनसत्त्वगुणाभ्यां, तथा च पञ्चमहाभूतानां सूक्ष्म-स्थूलशरीराणां सप्तदशावयवयुक्तानां च सृष्ट्या जगत् मोहे पातयति।

अपरत्र अपवादः नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्य अवस्तुनः प्रपञ्चस्य वस्तुमात्रत्वेन (ब्रह्मरुपेण) बाधनं निरसनं वा भवति। अत्र मृद्घटदृष्टान्तेन विकारविवर्तयोः सूक्ष्मं भेदं स्पष्टीकृत्य प्रतिपादितं यत् जगद् इदं ब्रह्मणः विवर्तः अस्ति, न तु स्वरूपविकारः। अनेन अध्यारोपापवादन्यायेन 'तत्त्वमसि' इत्यादिमहावाक्यानां वाच्यार्थं परित्यज्य लक्ष्यार्थस्य सम्यग् बोधः जायते, येन मुमुक्षुः जीवः अज्ञानं तदुपाधिश्च जित्वा स्वात्मानं नित्यशुद्धबुद्धमुक्तं चैतन्यस्वरुपं तुरीयं ब्रह्म एव इति साक्षात्करोति।

**कूटशब्दाः** – अध्यारोपः, अपवादः, विवर्तः, अज्ञानः, समष्टि व्यष्टि इत्यादयः।

**भूमिका :** दर्शनम् – दर्शनार्थकात् दृश्-धातोः ल्युट् प्रत्यये"दर्शनम्" इति

शब्दः निष्पद्यते। दर्शनस्य मानवजीवनेन सह सामीपिकः सम्बन्धः वर्तते। मनुष्यः स्वभावेन चिन्तनशीलः भवति - इदं विश्वं कुतः उद्भूतम्? कुत्र विलीनं भविष्यति? कोऽहम्? एवं तत्वपरकपदार्थानां विश्लेषणं दर्शनमिति उच्यते। नासदीयसूक्तस्य द्रष्टा ऋषिः उक्तवान् –

**को अद्धा वेद क इह प्रवोचत्कुत आजाता कुत इयं विसृष्टिः।**

**अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव** ॥[1]

एतेषां विषयाणां विश्लेषणं दर्शनशास्त्रे भवति। यतोहि दर्शनशास्त्रस्य प्रतिपाद्यविषयः ज्ञेयः नास्ति, अपितु ज्ञाता अस्ति। संसारस्य समस्तपदार्थानां भेदद्वयं कर्तुं शक्यते - ज्ञाता ज्ञेयश्च। मनुष्याः विभिन्नशास्त्रेभ्यः विभिन्नविषयाणां ज्ञानप्राप्तिं कुर्वन्ति परन्तु इदं न विचारयन्ति यत् विषयस्य ज्ञानकर्ता कः इति। तस्य वास्तविकस्वरूपं किमस्ति ? जगतः, जगत्विषयकसमस्तज्ञानानां, विचाराणां, व्यवहाराणाञ्च मूलाधारः ज्ञाता वर्तते। अस्यैव ज्ञातुः स्वरुपम् अवगन्तुं प्रयत्नः दर्शनशास्त्रे भवति। प्रमातुः स्वरुपबोधः एव मानवजीवनस्य परमपुरुषार्थः वर्तते। यतोहि समस्तविचारव्यवहाराणाम् अधिष्ठानत्वात् तत् एकमात्रं सत्यं वर्तते। तस्यैव विषये श्रुतिरपि कथयति - **इह चेद-वेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः। भूतेषु भूतेषु विचित्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति**॥[2]

**उत्तरमीमांसा (वेदान्तदर्शनम्) :** उत्तरमीमांसादर्शने अध्यात्मविद्यायाः ब्रह्मविद्यायाः जीवब्रह्मणः स्वरुपस्य च विवेचनं वर्तते। वेदानाम् अन्तिमे भागे (उपनिषदि) ब्रह्मणः प्रतिपाद्यत्वेन उत्तरमीमांसा अभिधीयते। उपनिषद् इति शब्देन वैदिकदार्शनिकसाहित्यस्य बोधः भवति। अन्येषां दर्शनानामपेक्षया अद्वैतवेदान्तदर्शनस्य वैशिष्ट्यम् इदं वर्तते यत् अस्मिन् दर्शने सच्चिदानन्दब्रह्मणः एव सत्ता स्वीक्रियते। तद्ब्रह्म अनिर्वचनीयमायाशक्त्या युक्तं सत् ईश्वरः भवति एवं नामरुपात्मकप्रपञ्चसृष्टिमुद्भावयति। अज्ञानस्य कार्यभूत-कारणसूक्ष्मस्थूल-त्रिविधशरीरोपाधियुक्तं सद् एकमात्रसच्चिदानन्दब्रह्म एव जीवः भवति। अतः जीवः अपि परमार्थतः ब्रह्मैव। एवं जीवब्रह्मैक्यविषयकज्ञानं प्रस्थानत्रयीग्रन्थेषु बृहद्रूपेण प्राप्यते। प्रस्थानत्रयीग्रन्थेषु च श्रीमद्भगवद्गीता, ब्रह्मसूत्राणि, उपनिषदश्च आगच्छन्ति।

वेदान्तिनां परमं प्रमाणं वेदाः एव भवन्ति, उक्तमपि - **वेदान्तो नाम उपनिषत्प्रमाणम्** इति। भगवता शङ्कराचार्येण इव अन्यैरपि आचार्यैः वेदान्तस्य अनेकधा व्याख्याः कृताः, येन प्रस्थानत्रयीग्रन्थाः एव विविधसम्प्रदायानाम् आधाररूपेण प्रतिष्ठिताः अभवन्।

अद्वैतवादस्य प्रवर्तकः शङ्कराचार्यः अस्ति। ब्रह्मसूत्रे उपलब्धभाष्येषु सर्वप्राचीनभाष्यं शाङ्करभाष्यमेव वर्तते। शङ्कराचार्यः अनेकेषु स्थलेषु अद्वैतवेदान्तम् औपनिषद्दर्शनम् इति नाम्ना सम्बोधितवान्। अद्वैतवेदान्तस्य प्रमुखसिद्धान्ताः – अद्वैतवेदान्तम् एकमात्रं ब्रह्म सत्यं नित्यं सर्वोपरतरुपेण च विद्यमानम् अथ च जगत् मिथ्यारुपमिति मन्यते। तथैव जीवः अपि तदेव अविनाशिरुपं ब्रह्मास्तीति प्रतिपादयति। अस्य प्रमाणं च उपनिषदः एव। एतस्य दर्शनस्य प्रारम्भः ब्रह्मजिज्ञासायाः भवति।

**ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।**

**जीवन्मुक्तस्तु तद्विद्वान् इति वेदान्तडिण्डिमः।।**[3]

अर्थात् - ब्रह्म सत्यमस्ति, जगत् मिथ्या वर्तते, जीवः ब्रह्मस्वरुपः एव अस्ति, तस्मात् भिन्नः नास्ति। एवं ये अपरोक्षसाक्षात्कारं कृतवन्तः ते जीवन्मुक्ताः कथ्यन्ते इत्येव अस्य कथनं वर्तते। वस्तुतः अस्य परब्रह्मणः ज्ञानानन्तरम् अन्येषां तत्त्वानां ज्ञानस्य आवश्यकतैव न भवति। ब्रह्मशब्दं व्याकरणपक्षे पश्यामश्चेत् - वृद्ध्यर्थकात् 'बृह् वृद्धौ' इति धातोः मनिन् प्रत्यये ब्रह्मशब्दः निष्पद्यते। वेदान्तानुसारम् इदं ब्रह्मतत्त्वं प्रत्यक्षानुमानोपमानशब्दादिप्रमाणैः अवगन्तुं न शक्यते, किन्तु वेदान्तप्रोक्तानाम् अनुभववाक्यानाम् आधारेण अहमेतादृशः इति स्वस्यैव अनुभवेन अवगन्तुं शक्यते। तथैव औपनिषदिकवाक्यानि अपि ब्रह्मणः सत्तायां प्रमाणरुपेण उपस्थाप्यन्ते। ब्रह्मतत्त्वस्य लक्षणविषये वेदान्तदर्शने उच्यते सत् चित् आनन्दः इत्येतेषां त्रयाणां शब्दानां माध्यमेन ब्रह्मणः स्वरुपं सामान्यरुपेण प्रतिपादयितुं शक्यते।

श्रुतिवाक्यानि अपि अस्मिन् विषये प्रमाणानि सन्ति।

**सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद..... विपश्चितेति। ।"[4]**

तद् परब्रह्म सत्यस्वरुपमस्ति। छान्दोग्योपनिषदि अस्मिन् विषये कथनम् अस्ति - सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्। अर्थात् - सृष्ट्यारम्भे अयम् एकमात्रः अद्वीतीयः सत् एव आसीत्। वेदान्तानुसारं सा सत्ता केवलं परब्रह्मणः एव आसीत्। अस्मिन् विषये शङ्कराचार्यः कथयति ब्रह्म एव एकमात्रं सद्वस्तु अस्ति। एतदतिरिच्य अस्मिन् वेदान्ते ब्रह्मणः स्वरुपम् अवाङ्गमनसगोचरमिति कथितमस्ति। यतोहि तत् ब्रह्म वयं न तु नेत्राभ्यां द्रष्टुं शक्नुमः, न मनसा न वा वाण्या ज्ञातुं शक्यते। अस्य ब्रह्मणः स्वरुपज्ञानाय, जगतः सृष्ट्योत्पत्यादिविषये च अध्यारोपापवादन्यायेन वेदान्तसारनामके प्रकरणग्रन्थे कश्चन प्रयत्नः विहितः वर्तते।

**वेदान्तसारः** सदानन्दयोगिना विरचितः वेदान्तपरम्परायाः अन्यतमः ग्रन्थः अस्ति, यस्य रचना 16 शतके अभवत्। वेदान्तसारः वेदान्तसिद्धान्तानां सरलतया ज्ञानाय मार्गं प्रशस्तीकरोति। अनया दृष्ट्या अयं ग्रन्थः सर्वाधिकः लोकप्रियः अस्ति। वेदान्तसारस्य लेखकः सदानन्दः अद्वैतवेदान्तस्य प्रायः सर्वेषां पूर्वप्रधानग्रन्थानाम् आश्रयं स्वीकृत्य स्वग्रन्थं लिखितवान्। अस्य आश्रयग्रन्थेषु शङ्कराचार्यस्य शारीरकभाष्यं प्रमुखं वर्तते। वेदान्तसारस्य लेखकः एतत् कठिनं कार्यं सुलभं कृतवान्। वेदान्तसारे अद्वैतवेदान्तस्य सिद्धान्तानां समन्वितं, संक्षिप्तं, सरलं रुपं च प्राप्तं भवति। शैलीदृष्ट्या अपि वेदान्तसारः सरलः सम्पुष्टः सम्पूर्णः च ग्रन्थः अस्ति।

अस्य वेदान्तशास्त्रस्य अनुबन्धचतुष्टयस्य वर्णनं वेदान्तसारस्य आदौ कृतं वर्तते। तत्र हि तस्य चत्वारि लक्षणानि प्रोक्तानि। नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसम्पत्तिः मुमुक्षुत्वं च। एतैः गुणैः सम्पन्नः अधिकारी यदा संसारस्य नानाविधदुःखैः पीडितः सन् तत्त्वज्ञानाय गुरोः समीपं गच्छति, तदा गुरुः अध्यारोप-अपवादन्यायेन तत्त्वस्य उपदेशं करोति - **अयमधिकारी जननमरणसंसारानलसन्तप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः गुरुमनुसृत्य तमनुसरति[5]।** को नाम अध्यारोपः, कश्च अपवादश्चेदुक्तं तत्रैव वेदान्तसारे – वस्तुनि तत्सदृशवस्तुनः भ्रमः अध्यारोपः कथ्यते। यथा असर्पभूतायां रज्जौ सर्पस्य आरोपः, अर्थात् अन्धकारे विद्यमानरज्जौ सर्पस्य भ्रान्तिः अध्यारोपः कथ्यते। अस्याः प्रक्रियायाः मूलकारणं रज्जुविषयकमज्ञानमेव। तथैव वस्तुरुपे ब्रह्मणि अवस्तुरुपस्य अज्ञानस्य आरोपः अध्यारोपः भवति। वस्तु - सच्चिदानन्दस्वरुपम् अनन्तम् अद्वयं ब्रह्म। अवस्तु - अज्ञानादिसम्पूर्णजडसमुदायः। इदमज्ञानं सत् एवम् असत् उभाभ्याम् अनिर्वचनीयम् अस्ति अर्थात् अज्ञानं वाण्याः विषयभूतं नास्ति। त्रिगुणात्मकं (सत्वरजोतमोगुणात्मकम्) ज्ञानस्य विरोधी अर्थात् इदमज्ञानं त्रिगुणैः युक्तं सत् ज्ञानस्य विषयः नास्ति। भावरुपं किञ्चिदस्ति इति वृद्धजनाः कथयन्ति। अहम् अज्ञानी अस्मि इत्याद्यनुभवः जनानां वर्तते एव इति हेतोः अस्य अज्ञानस्य एतादृशं स्वरुपमवगम्यते। अस्य विषये "**देवात्मशक्तिं स्वगुणैर्निगूढाम्**" इत्यादिश्रुतिः प्रमाणमस्ति।

**ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्।**
**यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येकः। ।[6]**

ते योगिनः ध्यानयोगे प्रतिष्ठिताः अभवन्। अर्थात् बाह्यविषयेभ्यः मनः इन्द्रियाणि च निवर्तयित्वा परब्रह्मणः चिन्तने तत्पराः अभवन्। ध्यानं कुर्वन्तः योगिनः सच्चिदानन्दस्वरुपस्य परब्रह्मपुरुषोत्तमस्वरुपस्य अचिन्त्यदिव्यशक्तेः च साक्षात्कारं कृतवन्तः। कालतः कारणपर्यन्तम् अर्थात् तृणतः ब्रह्मपर्यन्तं यानि वस्तूनि सन्ति तेषां समस्तकारणानां समस्तवस्तूनां यः एकमात्रस्वामी अधिष्ठाता वर्तते, ते सर्वे च यस्य प्रेरणया स्वस्वकार्येषु प्रवृत्ताः भवन्ति, सः एकाकी सर्वशक्तिमान् परमेश्वरः अस्य जगतः वास्तविककारणं वर्तते।

**अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरुपम्।** [7]

समष्टिः एवं व्यष्टिः इत्यभिप्रायेण इदमज्ञानम् एकं तथा अनेकम् इति द्वयोः रुपयोः व्यवह्रियते। यथा अनेक-वृक्षेषु

समष्ट्यभिप्रायेण एकत्वसूचकं वनम् इति नाम व्यवह्रियते, यथा वा जलानां समष्टेः विवक्षया जलाशयः इति नाम व्यवह्रियते, तथैव अन्तःकरणोपाधिभेदेन अनेकरूपे प्रतिभासमानानां जीववर्त्यज्ञानानां समष्टेः अभिप्रायेण तदेकत्वव्यपदेशः भवति। श्वेताश्वेतरोपनिषदः "अजामेकां" इत्यादिश्रुतिः एनं विषयं प्रमाणयति।

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः। ॥"[8]**

इयं प्रकृतिः स्वस्य अधिष्ठातुः ईश्वरस्य अध्यक्षतायां सरुपाः प्रजाः अर्थात् त्रिगुणसम्पन्नान् असंख्यजीवदेहान् उत्पादयति।

त्रिगुणमयी त्रिगुणात्मिका अर्थात् त्रिवर्णात्मिका - सत्वः, रजः, तमः इति एते त्रयः गुणाः एव त्रयः वर्णाः सन्ति। सत्वगुणं निर्मलेन एवं प्रकाशत्वेन श्वेतवर्णीयः उच्यते। रजोगुणः रागात्मकः रक्तवर्णीयः उच्यते। तमोगुणं अज्ञानरुपेण आवरणत्वेन कृष्णवर्णीयः उच्यते। सांख्यदर्शनस्य प्रकरणग्रन्थे सांख्यकारिकायां त्रिगुणविषये उद्धरणं प्राप्तं भवति। गुणनिरूपणम् -

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥[9]**
**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भक चलंच रजः।**
**गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥[10]**

एकः अजः अर्थात् अज्ञानी जीवः तस्याः त्रिगुणात्मिकायाः प्रकृतेः भोगे सक्तः भवति। त्रिगुणात्मिकप्रकृतेः विषये सांख्यकारिकायां उद्धृतमस्ति।

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान्। ।[11]**

एवं अन्यः जनः अर्थात् ज्ञानी आत्मवेत्ता महापुरुषः एनां भुक्तभोगां प्रकृतिं त्यजति। उत्कृष्टोपाधियुक्तत्वेन इयं समष्टिः विशुद्धसत्वप्रधाना गुणयुक्ता वर्तते। उपध्युपहितत्वेनेदं चैतन्यं सम्पूर्णाज्ञानस्य प्रकाशकत्वेन सर्वज्ञाता सर्वेश्वरः सर्वनियन्तृत्वादिगुणैः युक्तः अव्यक्तः जगत्कारणभूतः ईश्वरः इत्यादिनामभिः व्यपदिश्यते। यः ईश्वरः सामान्यरुपेण सर्वं जानाति सः सर्वज्ञः एवं यः विशेषरुपेण सर्वं जानाति सः सर्ववित् "यः सर्वज्ञः सर्ववित्" इत्यादिश्रुतिः अस्मिन् प्रमाणमस्ति।

**यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः।**
**तस्मादेतद्ब्रह्म नाम रुपमन्नं च जायते। ।[12]**

सः सकलजगतः कारणभूतः परमपुरुषः परमेश्वरः परमात्मा साधारणरुपेण विशेषरुपेण च सर्वं जानाति। सः ईश्वरः सामान्यरुपेण सर्वं जानाति तर्हि सर्वज्ञः एवं सः विशेषरुपेण सर्वं जानाति तर्हि सर्ववित्। सर्वज्ञ सर्वविदः ब्रह्मणः परमात्मनः एकमात्रज्ञानमेव तपः वर्तते। तस्य तपः साधारणमनुष्यस्येव नास्ति। सर्वशक्तिमतः परब्रह्मपरमेश्वरस्य संकल्पमात्रेणैव इदं प्रत्यक्षदृष्टिगोचरं विराट्रूपं जगत् स्वतः उत्पद्यते। एवं समस्तप्राणिनां नामरुपाहारादयः अपि स्वतः उत्पन्नाः भवन्ति।

अज्ञानस्य समष्टिव्यष्टिविषये पूर्वं चर्चा कृता। यथा वनविषये व्यष्ट्यभिप्रायेण अनेकत्त्वसूचनाय एतानि वृक्षाणि सन्ति इति व्यवह्रियते। अथवा जलाशयविषये व्यष्ट्यभिप्रायेण एतानि जलानि (जलबिन्दवः) सन्ति इति व्यवह्रियते। तथैव जीवगताज्ञानानाम् अनेकत्वं प्रदर्शयितुम् अनेकतया व्यवह्रियते। अज्ञानकारणेन आत्मा बहुरुपेषु दृश्यते प्रतिभासते वा। " **इन्द्रो मायाभिः पुरुरुप ईयत्**" इत्यादिश्रुतिः इमं विषयं प्रमाणयति।

**इदं वै........रुपं रुपं प्रतिरुपो बभूव तदस्य रुपं प्रतिचक्षणाय।**

**इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेति ....... नुशासनम्। ।**[13]

अस्मिन् मन्त्रे ऋषिः दध्यङ्ङाथर्वणः अश्विनीकुमारौ उपदिशति। ऋषिः उवाच - अयं परमेश्वरः परमात्मा स्वात्मनः रूपं प्रकाशनाय अनेकरूपाणि दधार। सर्वज्ञः ईश्वरः स्वमायया नानोपाधिभिः नानारुपेषु अवभासते। अत्र इन्द्रनामा सर्वज्ञः परमात्मा नानारूपेषु प्रतिभासते इति वर्णितम्। प्राणिभेदस्य बाहुल्येन ते शतानि दश च सन्ति। अतः इन्द्रियाणां बाहुल्येन तानि इन्द्रियाणि एनान् विषयान् प्रकाशयितुं नियुक्तानि सन्ति। अज्ञानस्य इयं समष्टिः उत्कृष्टोपाधितया विशुद्धसत्वगुणा भवति। एतदुपहितं चैतन्यं समस्ताज्ञानराशेः प्रकाशकत्वात् सर्वज्ञातृत्व, सर्वेश्वरता, सर्वनियामकता इत्यादिगुणैः युक्तः भूत्वा अव्यक्तः अन्तर्यामी जगतः कारणम् ईश्वरः इति नाम्ना बोध्यते। एवं अज्ञानस्य इयं व्यष्टिः निकृष्टोपाधियुक्तत्वेन मलिनसत्वगुणप्रधाना भवति। निकृष्टोपाधियुक्तचैतन्यम् अल्पज्ञाता, अशक्तता आदिगुणयुक्तत्वात् व्यष्टिगतस्य एकस्याज्ञानस्य प्रकाशकत्वात् प्राज्ञः इति नाम्ना बोध्यते। प्रलयकाले एवं सुषुप्तावस्थायां ईश्वरः एवं प्राज्ञः उभौ चैतन्येन प्रकाशितौ अर्थात् चिदात्मनः प्रतिबिम्बेन युक्ताज्ञानस्य (अस्पष्टम्, दुर्लक्ष्यम्) सूक्ष्मवृत्तिभिः स्वरुपभूतमानन्दम् अनुभवतः। **"आनन्दभुक् चेतोमुखः प्राज्ञ"** इति श्रुतिः प्रमाणयति।

**यत्र सुप्तो न कञ्चन कामं कामयते**
**न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम्।**
**सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो**
**ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पादः ॥**[14]

भावः अयं वर्तते यत् यथा सुषुप्तावस्थायां सुप्तः मनुष्यः कञ्चनमपि कामं न कामयते अर्थात् भोगस्य कामना न करोति न च किमपि कामं अनुभवति कञ्चनमपि स्वप्नं न पश्यति तदवस्थां सुषुप्तिः अवस्था कथ्यते। एतादृशं सुषुप्त-यावस्थासदृशं अर्थात् कारणावस्था वर्तते यस्मिन् नानारुपाणां प्राकट्यः न अभवत् एतादृशं अव्यकृतकार-णावस्थाप्रकृतिः यस्यशरीरः वर्तते एवं यः एकः अद्वितीयरुपेस्थितमस्ति यः एकमात्रघनीभूतविज्ञानस्वरूपः वर्तते उपनिषत्सु यस्य वर्णनं कुत्रचित् सत् नाम्ना **'सदेव सोम्येदमग्र आसीत्'**[15] एवं कुत्रचित् आत्मा नाम्ना **'आत्मा वा इदमेक एवाग्र आसीत्'**[16] वर्णितमस्ति आनन्दमयः अर्थात् यः एकमात्रमानन्दमयानन्दस्वरुपः वर्तते चेतोमुखः अर्थात् चेतः प्रकाशः एव यस्य मुखमस्ति आनन्दभुक् अर्थात् यः एकमात्रमानन्दस्वरुपस्य भोक्ता वर्तते सः विज्ञानघनः आनन्दमयः प्राज्ञः एव तत्पूर्णपरब्रह्मपरमेश्वरस्य तृतीयः पादः वर्तते।

अज्ञानस्य समष्टिव्यष्टयोः अभेदसम्बन्धः वर्तते यथा वने एवं वृक्षेषु अभेदः वर्तते अथवा जलाशये एव जलबिन्दुषु अभेदः वर्तते तथैव अज्ञानस्य समष्टिव्यष्टिभ्यामोपहिते चैतन्ये ईश्वरे एवं प्रज्ञे तथैव अभेदः सम्बन्धः वर्तते यथा वनावच्छिन्नाकाशः एवं वृक्षावच्छिन्नाकाशः एकः भवति अथवा जलाशये प्रतिबिम्बिताकाशः एवं जलबिन्दुषु प्रतिबिम्बिताकाशः एकः समानः भवति। **"एष सर्वेश्वरः"** इत्यादिश्रुतिः एतयोः ईश्वरप्राज्ञयोः ऐक्यं सिध्यति।

**एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभावप्ययौ हि भूतानाम् ॥**[17]

यस्य परब्रह्मपरमेश्वरस्य त्रयाणां पादानां रुपे वर्णनं कृतं, सः परमेश्वरः ईश्वरप्राज्ञवैश्वानरविराटविश्वसूत्रात्मातैजसादिनां सकलानामीष्वराणामपि ईश्वरः अस्ति। सः एव सर्वज्ञाता सर्वनियन्ता सर्वज्ञः अन्तर्यामी वर्तते। सः एव सर्वस्य जगतः कारणमस्ति। यतोहि सर्वेषां प्राणिनाम् उत्पत्तेः, स्थितेः एवं प्रलयस्य स्थानम् एषः एव वर्तते। वनवृक्षाभ्याम् एवम् एताभ्याम् अवच्छिन्नाकाशयोः आधारभूतः अनुपहिताकाशः भवति अथवा जलाशयजलबिन्दुषु एवम् एतेषु प्रतिबिम्बिताकाशस्य आधारभूतः अनुपहिताकाशः भवति। तथैव अज्ञानस्य समष्टिव्यष्टिभ्याम् एवम् एताभ्याम् उपहितचैतन्ययोः ईश्वरप्रज्ञयोः आधारभूतं यदनुपहितं चैतन्यं भवति। तं परमेश्वरं तुरीयः चतुर्थः उच्यते कथ्यते। **"शिवमद्वैतं चतुर्थं मन्यन्त"**[18] इत्यादिश्रुतिः प्रमाणयति।

**नान्तः प्रज्ञं न बहिष्प्रज्ञं नोभयतः प्रज्ञ न प्रज्ञानघनं न प्रज्ञं अदृष्टमव्यवहार्यमग्राह्यमलक्षण-**

**मचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थ मन्यन्ते स आत्मा स विज्ञेयः ॥"**[19]

अस्मिन् मन्त्रे निर्गुण निराकार निर्विशेषपूर्णब्रह्मपरमात्मनः स्वरुपस्य चतुर्थपादस्य वर्णनमस्ति। भावः अयं वर्तते सः चतुर्थः शिवमद्वैतब्रह्म कीदृशः वर्तते तर्हि उच्यन्ते। यः न अन्तः प्रज्ञमस्ति, न बहिष्प्रज्ञमस्ति, न तु उभयतः प्रज्ञवर्तते, न ज्ञानस्वरुपमस्ति, न प्रज्ञानघनमस्ति, न ज्ञाता वर्तते, न प्राज्ञं न अप्रज्ञं वर्तते, न दृष्टिगोचरः अस्ति, तं व्यवहारे व्यवहृतुं न शक्यते, एवं यः अग्राह्यं वर्तते, यस्य कोपि लक्षणं **(लक्षणन्त्वसाधारणधर्मवचनम्)** नास्ति यः अचिन्तनीयमस्ति, एवं यः अवचनीयमस्ति, एकमात्र आत्मसत्तायाः प्रतीतिः यस्य सारं प्रमाणमस्ति, एवं यस्मिन् समस्त-प्रपञ्चानां अभावः वर्तते। एतादृशः सर्वथा-शान्तं-शिवं-कल्याणमयं-अद्वितीयतत्वः परमेश्वरः सः पूर्णब्रह्म-परमात्मा वर्तते। एतादृशः परमेश्वरस्य यस्य चत्वारः पादाः सन्ति। सः ज्ञातुं योग्यमस्ति। सः एव पूर्णब्रह्मपरमात्मा वर्तते। इदं यत् तुरीयं वर्तते। यं शान्तं शिवमद्वैतं मन्यन्ते। इदं शुद्धचैतन्यं ब्रह्म वर्तते। सः अज्ञानस्य समष्टिव्यष्टिभ्यामोपहिताभ्यां द्वाभ्यां चैतन्याभ्याम् ईश्वरप्राज्ञाभ्यां सह तप्तलौहपिण्डवत् एकत्वसूचकः व्यवहारः भवति। तत् महावाक्यं (तत्त्वमसि)" तत् त्वम् असि इत्यस्य वाच्यार्थः वर्तते। यः अनेकत्वविवक्षायां महवाक्यस्य लक्ष्यार्थः अस्मिन्नेव रुपे उक्तम्। अद्वैतवेदान्तदर्शनः तत् त्वमसि एतेन महावाक्येन जीवब्रौक्यं स्थापयति। अत्र तप्ताय पिण्डवत्दृष्टान्तरुपे वर्णितमस्ति।

यथा - तप्तायपिण्डम्

वाच्यर्थः - लौहपिण्डात् अग्रेः अभेदतायाः प्रतीतिः।

लक्ष्यार्थः - अग्रेः लौहपिण्डात् भेदप्रतीतिः

समष्टिव्यष्टिभेदेन अज्ञानस्य द्वयोः भागयोः विस्तृतरुपेण वर्णितम्। इदानीम् अज्ञानस्य द्वयोः शक्तयोः निरुपयते।

अज्ञानस्य आवरणविक्षेपनामनी द्वे शक्ती स्तः।

आवरणशक्तिः-यथा मेघः अल्पोभूत्वापी दर्शनस्य दृष्टिपथम् आच्छादायित्वा अनेकयोजनायतनं सूर्यमण्डलं आच्छादयति। तथैव अज्ञानं परिच्छिन्नं भूत्वाऽपी अधिकारिणः बुद्धिम् आच्छादनेन अपरिच्छिन्नम् असंसारी आत्मानम्आच्छादयतीव, आचार्यैः उक्तमपि-

**"घनच्छन्नदृष्टिर्घनच्छन्नमर्कै यथा मन्यते निष्प्रभं चातिमूढः।**

**तथा बद्धवद् भाति यो मूढदृष्टेः स नित्योपलब्धिस्वरुपोऽहमात्मा। ।**[20]

यथा अतिमूढः मनुष्यः मेघेन दृष्ट्याच्छादनेन सूर्य घनच्छन्नं निष्प्रभं च मन्यते, तथैव मूढदृष्टेः यः (आत्मा) बद्धवत् भाति, सः नित्योपलब्धिस्वरुपः आत्मा (एव) अहम् अर्थात् सः नित्यज्ञानस्वरुपात्माअहमस्मि **(अहं ब्रह्मास्मि)**[21] एतस्य अनुभववाक्यस्य ज्ञानं भानं भवति। एवं यथा अज्ञानेन आच्छादितरज्जौ सर्पत्वसम्भावना भवति तथैव अज्ञानस्य आवरणशक्त्या अवच्छिन्नात्मनि कर्तृत्व, भोकृत्व, सुखदुःखमोहस्वरुपतुच्छसंसारेण युक्तत्वभावनापि सम्भाव्यते।

विक्षेपशक्तिः -अज्ञानेन स्ववृतात्मनि स्वविक्षेपशक्त्या आकाशादिकार्यसमूहं जगत्प्रपञ्चमुद्भावयति। उक्तमपि-

**शक्ति इयं ही मायाया विचेपावृत्ति रुपकम्।**

**विक्षेप शक्तिर्लिङ्गादि ब्रह्माण्डान्तं जगत्सृजेत्। ।**[22]

अर्थात् - मायायाः शक्ती द्वे स्तः विक्षेपरुपः एवं आवरणरुपः विक्षेपलिङ्गशक्तिः सूक्ष्मशरीरतः (स्थूलः) ब्रह्माण्डपर्यन्तं जगतुत्पादयति। अर्थात् जगतः कारण वर्तते। **अतिशयितं साधकं साधकतमं प्रकृष्टं कारणमित्यर्थः।**[23] तमोगुणप्रधानयुक्तविक्षेपशक्तिसम्पन्नाज्ञानोपहितचैन्यात् (ईश्वरात्) आकाशः उत्पद्यते। **आकाशाद्वायुर्वायोरग्निरग्नेरा-पोऽद्भ्यः पृथिवी चोत्पद्यते।** [24] अज्ञानोपहितचैतन्यात् आकाशः एवं आकाशात् पुनः वायुः अग्निः जलं पृथिवी च उत्पद्यन्ते तत्तिरियोपनिषदः इयं श्रुतिः "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः "" इत्यादिश्रुतिः प्रमाणयति।

**तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुषः। स वा एष पुरुषोऽन्नरसमयः। तस्येदमेव शिरः। अयं दक्षिणः पक्षः।**

**अयमुत्तरः पक्षः। अयमात्मा। इदं पुच्छ प्रतिष्ठा। तदप्येष श्लोको भवति।** [25]

मन्त्रेस्मिन् परंपितापरमेश्वरस्य मनुष्यस्य हृदयरूपगुहायां निहितं आत्मतत्त्वस्य वर्णनोद्येश्येन मनुष्यस्य अङ्गानां पक्षिणः अङ्गानां रुपे कल्पितः अस्ति। भावः अयं वर्तते निश्चयेन सर्वप्रथमः एतस्मात् सर्वान्तर्यामीपरमात्मनः प्रारम्भे आकाशतत्वः संभूतः उत्पन्नः जातः एवं आकाशतत्वात् वायुः उत्पन्नः अभवत् वायोः अग्निः उत्पन्नः अग्नेः आपः (जलं) अजायत अद्भ्यः पृथिवी उत्पन्ना अभवत् एवं पृथिव्याः समस्त औषधयः उत्पन्नाः अभवन् औषधिभ्यः अन्नं उत्पन्नं अभवत् एवं अन्नात् अयं पुरुषः मनुष्यशरीरधारीपुरुषस्य पक्षिणः स्थूलमनुष्यशरीररूपपुरुषः उत्पन्नोजातः। अन्नरसमयः अस्य रुपे कल्पना वर्तते। तेषु आकाशादिपञ्चमहाभूतेषु जाड्याधिक्यत्वात् तमोगुणस्य प्रधनाता दृश्यते। एतानि आकाशादिपञ्चमहभूतानि स्मृतिषु एवं पुराणेषु वेदान्ते च सूक्ष्मभूतानि, तन्मात्राणि, अपञ्चीकृतानि इत्यादिनामभिः उच्यन्ते। एतेभ्यः अपञ्चीकृतमहभूतेभ्यः सूक्ष्मशरीराणाम् स्थूलभूतानां च उत्पत्तिः भवति। सूक्ष्मशरीराणां सप्तदशावयवाः भवन्ति। अवयवाः तु पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, वायुपञ्चकं बुद्धिः मनः इति सूक्ष्मशरीराणां शप्तदशावयवाः भवन्ति। सूक्ष्मशरीरमेव लिंङ्गशरीरमपि उच्यन्ते एतानि ज्ञानेन्द्रियाणि आकाशादिपञ्चमहाभूतानां सत्विकांशेभ्यः क्रमेण पृथक् पृथक् उत्पद्यन्ते। चित्तस्य एवं अहङ्कारस्य मनबुद्ध्योः अन्तर्भावः वर्तते। एवं एते सर्वे (मनबुद्धिचित्ताहंकाराः) आकाशादिपञ्चमहाभूतेषु स्थितसत्विकांशेभ्यः मिलितेभ्यः उत्पद्यन्ते। पञ्चज्ञानेन्द्रियैः **ज्ञानेन्द्रियाणि-श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि"**[26] सहिता इयं बुद्धिः **बुद्धिर्नाम निश्चयात्मिकान्तः करणवृत्तिः**[27] विज्ञानमयकोशः भवति एवं मनः **मनो नाम सङ्कल्पविकल्पात्मिकान्तः करणवृत्तिः**[28] ज्ञानेन्द्रियैः सह मनोमयकोशः भवति। **कर्मेन्द्रियाणि-वाक्पाणिपादपायूपस्थानि**[29]।

अनेन प्रकारेण सूक्ष्मशरीरस्य उत्पत्तिः भवति। पञ्चीकृतानि आकाशादि पञ्चमहाभूतानि एव स्थूलभूतानि उच्यन्ते।

**द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।**
**स्वस्वेतरद्वितीयांशैर्योजनात्पञ्चपञ्च ते" इति।।**[30]

| अंश | आकाश ½ | वायु ½ | अग्नि ½ | जल ½ | पृथिवी ½ |
|---|---|---|---|---|---|
| 1/8 | वायु | आकाश | आकाश | आकाश | आकाश |
| 1/8 | अग्नि | अग्नि | वायु | वायु | वायु |
| 1/8 | जल | जल | जल | अग्नि | अग्नि |
| 1/8 | पृथिवी | पृथिवी | पृथिवी | पृथिवी | जल |

**अतस्तत्तद्भासकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावं प्रत्यक्चैतन्यमेवात्मवस्त्विति वेदान्तविद्वदनुभवः ॥**[31]

इत्थं प्रतिपादितविषयानुसारं समेषामपि पदार्थानाम् अवभासकः सन् यः नियततया मायागुणैः अस्पृष्टः, सर्वज्ञः, सर्वदा बन्धराहित्येन मुक्तस्वरुपः, परमसत्यस्वभावः, सर्वेषामनुभवगम्यः, चैतन्यरुप आत्मा एव अस्माकमनुभवगम्यः प्रत्यगात्मा अस्तीति विदुषां साक्षादनुभवः वर्तते।

**एवमध्यारोपः ॥**

अनेन प्रकारेण वेदान्तसारनामके ग्रन्थे अध्यारोपस्वरूपं वर्णितम्।

**अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्यावस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् ॥ 137॥**[32]

अधुना अपवादवाक्यार्थः वर्ण्यते। तत्र यथा मन्द-अन्धकारे रज्जुं दृष्ट्वा रज्जुविषयक-ज्ञानहीनः रज्जुम् अज्ञात्वा तद्भिन्नतया सर्पबुद्ध्या भीतः भवति। सः एव जनः यदा रज्जौ सर्पः भ्रान्त्या दृश्यमाणः अस्तीति ज्ञानपूर्वकं रज्जुस्वरूपस्य यथायथं ज्ञानवान् भवति, तेन च सर्पत्वस्य नाशपूर्वकं रज्जुमात्रस्य अस्तित्वं सिद्ध्यति। तथैव सच्चिदानन्दाद्वैतब्रह्मणि विवर्ततया दृश्यमाणम् अज्ञानादिप्रपञ्चम् अनुभूय बद्धोहमिति कल्पनायां मग्नः भवति लोकः। सः एव यदा ब्रह्मणि विवर्ततया दृश्यमाणम् अज्ञानादिप्रपञ्चम् असत्यतया पश्यन् सर्वत्र सर्वदा निर्विकाररूपेण विराजमानं ब्रह्मैव नित्यं वस्तु, ततोन्यद् नान्यत् किमपि वर्तते इति जानाति, तदा केवलं ब्रह्मणः सत्ता सिद्ध्यति। अयमेव अपवादनाम्ना व्यवह्रियते।

**तदुक्तम् -"सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः। अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदीरितः ॥**[33]

पूर्वोक्तप्रकारेण सच्चिदानन्दाद्वैतब्रह्मणि अज्ञानादिप्रपञ्चस्य विवर्तो जायते, न तु विकारः। विकारविवर्तयोः मध्ये कश्चन भेदः वर्तते इति स्पष्टयितुं वेदान्तसारकर्ता श्रीसदानन्दः वर्णयति **सतत्त्वतोऽन्यथा प्रथा ...** इत्यादिः। तत्र हि आचार्यः कथयति – यदा कारणं स्वस्वरूपम् अत्यक्त्वा अन्यथारुपं प्राप्नोति, तदा सः प्रकृतेः विकारः उच्यते। यथा मृत्तिकायाः घटः निर्मीयते, तत्र हि मृत्तिका स्वस्मिन् विद्यमानान् धर्मान् स्वस्वरुपं च अत्यक्त्वैव नामरुपाकृतिभिर्भिद्यते, किन्तु घटस्य प्रत्यंशं मृत्तिका एव कारणरूपेण व्याप्ता भवति। अयमुच्यते विकारः। एतद्भिन्नः विवर्तो नाम स्वतत्त्वरूपं विहाय अन्यथारुपस्य प्रतीतिः। यथा **सत्यं ज्ञानमनन्तं ब्रह्म**[34] इत्यादिश्रुतिभिः ब्रह्मणः विशुद्धं स्वरुपमुदितम्। किन्तु तस्य विवर्ततया दृश्यमाणः अज्ञानादिप्रपञ्चः सत्यभिन्नः ज्ञानभिन्नः अन्तयुक्तश्चास्ति। अतः अज्ञानादिप्रपञ्चः ब्रह्मणः विवर्तपरिणामः वर्तते, न तु विकारः। इतीत्थं प्रकारेण विकारविवर्तयोः कश्चन भेदोऽपि उपवर्णितः।

**शोधनिष्कर्षः** अस्य शोधस्य निष्कर्षेण ज्ञायते यत् अध्यारोपापवादन्यायः न केवलम् एका शास्त्रीया प्रक्रिया, अपितु अद्वैतवेदान्तस्य तत्त्वबोधस्य सर्वोत्कृष्टा दार्शनिकी पद्धतिः वर्तते। गुरुः संसारतापेन सन्तप्तं मुमुक्षुमधिकारिणं बोधयितुम् एतस्याः शिक्षणप्रणाल्याः आश्रयं गृह्णाति। प्रथमम् अध्यारोपेण जगतः प्रतीतिमयं प्रपञ्चं दर्शयित्वा, पश्चात् अपवादेन तस्य बाधं कृत्वा ब्रह्मणः अद्वैतभावः साध्यते। एतेन विश्लेषणेन सिद्धं भवति यत् अज्ञानमेव समस्तसंसारस्य, बन्धस्य, सुखदुःखादीनां च मूलकारणं अस्ति। यदा अधिकारिसाधकः 'तत्त्वमसि' इत्यादिमहावाक्यानां वाच्यार्थं त्यक्त्वा लक्ष्यार्थं गृह्णाति तथा च अज्ञानस्य आवरणविक्षेपयोः निरसनं करोति, तदा सः मिथ्याप्रपञ्चात् मुक्तः भूत्वा सच्चिदानन्दस्वरुपे तुरीये ब्रह्मणि अवतिष्ठते। अतः अध्यारोपापवादप्रणाली अज्ञाननिवृत्तेः, जीवब्रह्मैक्यस्य, परमार्थसत्यस्य साक्षात्कारस्य च वैज्ञानिकः निष्कृष्टश्च मार्गः अस्ति इति फलितो निष्कर्षः।

**संदर्भ-सूची :**

1. ऋग्वेद-संहिता, 10.129.6
2. केनोपनिषद्, 2.5
3. वेदान्तडिण्डिमः, श्लोक 67
4. तैत्तिरीयोपनिषद्, ब्रह्मानन्दवल्ली, 2.1.1
5. वेदान्तसारः, खण्ड 5
6. श्वेताश्वतरोपनिषद्, 1.3
7. वेदान्तसारः, अज्ञाननिरुपण प्रकरण, 11
8. श्वेताश्वतरोपनिषद्, 4.5
9. सांख्यकारिका, 12

10. सांख्यकारिका, 13
11. सांख्यकारिका, 11
12. मुण्डकोपनिषद्, 1.1.9
13. बृहदारण्यकोपनिषद्, 2.5.19
14. माण्डूक्योपनिषद्, 5
15. छान्दोग्योपनिषद्, 6.2.1
16. ऐतरेयोपनिषद्, 1.1.1
17. माण्डूक्योपनिषद्, 6
18. माण्डूक्योपनिषद्, 7
19. माण्डूक्योपनिषद्, 7
20. वेदान्तसार 16, हस्तामलकस्तोत्रम्, श्लोक 10
21. बृहदारण्यकोपनिषद्, 1.4.10
22. विवेकचूड़ामणि, श्लोक 111
23. तर्कभाषा, पृ. सं. 28-32
24. तैत्तिरीयोपनिषद, ब्रह्मानन्दवल्ली, प्रथम अनुवाक
25. तैत्तिरीयोपनिषद्, ब्रह्मानन्दवल्ली, प्रथम अनुवाक
26. वेदान्तसारः, सूक्ष्मशरीर-निरूपण, 63
27. वेदान्तसारः, सूक्ष्मशरीरनिरुपणम्, 65
28. वेदान्तसारः, सूक्ष्मशरीरनिरुपणम्, श्लोक 66
29. वेदान्तसारः सूक्ष्मशरीर-निरूपणम्, कर्मेन्द्रिय-निरुपण
30. वेदान्तसारः स्थूलभूत-पञ्चीकरण-निरुपणम्
31. वेदान्तसारः, अध्यरोप-प्रकरणम्,
32. वेदान्तसारः, अपवाद-प्रकरणम्, 137
33. वेदान्तसारः, अपवाद-निरुपणम्, श्लोक 138
34. तैत्तिरीयोपनिषद्, ब्रह्मानन्दवल्ली, 2.1.1

**संदर्भ-ग्रंथ-सूची :**


1. शङ्कराचार्यः, ईशादि नौ उपनिषद्, द्वितीय संस्करण, गीताप्रेस, गोरखपुर, सं. 2060
2. सदानन्दः, वेदान्तसारः, मिश्र, आद्याप्रसाद (सम्पा.), द्वितीय संस्करण, अक्षयवट प्रकाशन, इलाहाबाद, 2000
3. श्रीमद्भगवद्गीता, शाङ्करभाष्यसहिता, गीताप्रेस, गोरखपुर, 2000


•